# Shri Tandava Stotram

# श्रीताण्डवस्तोत्रम् १

## Document Information

Text title : Shri Tandava Stotram 02 38

File name : tANDavastotram1.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-38

Latest update : July 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# श्रीताण्डवस्तोत्रम् १

नमस्कृत्य रामं महादेवदेवं
भवानीकटाक्षेक्षणानन्दजालम् ।
तदालोकलोलं महानृत्यलीलं भजे
पार्वतीशं महाताण्डवेशम् ॥ १॥

भवान्तं भजे तं हृदन्ते महान्तं
भवाब्धिं तरन्तेन्दुकुन्दावभासं
(भवाब्धेस्तरन्तीं दुकूलावभासम्) । (तरन्ती-नौका)
तमीशं रमेशार्चिताङ्घ्रि (द्वयाब्जं)
भजे पार्वतीशं महाताण्डवेशम् ॥ २॥

जटाजूटसोमं ललाटाक्षभीमं
नटाचार्यवामं सदा पूर्णकामम् ।
सदावामभामं हृदानन्दरामं
भजे पार्वतीशं महाताण्डवेशम् ॥ ३॥

धराश्रीशवागीशनागेशमुख्यैः
सुरैः सेवितं तालवीणादिहस्तैः ।
पदाघातसङ्घातसङ्घृष्टदैत्यं
भजे पार्वतीशं महाताण्डवेशम् ॥ ४॥

रणन्नूपुरद्वन्द्वहारि स्वकीयाङ्घ्रि-
पद्मद्वयाम्भोरुहापूर्णविश्वम् ।
नमन्मध्यसाचीकृतस्वाङ्घ्रिपद्मं
भजे पार्वतीशं महाताण्डवेशम् ॥ ५॥

शिवाशेषबन्धो कृपापूर्णसिन्धो
शिवानन्दसन्दोहसन्धानबन्धो ।
महाश्चर्यनृत्योल्लसत्पादपद्मं

भजे पार्वतीशं महाताण्डवेशम् ॥ ६॥

कटिप्रान्तसम्बन्धिसौवर्णसूत्रं
प्रलम्बप्रकीर्णोरुघण्टानिनादम् ।
महासिंहनादं प्रभिन्नाब्दजालं
भजे पार्वतीशं महाताण्डवेशम् ॥ ७॥

भ्रमद्बाहुदण्डं गदापूर्णरत्नं
प्रभो क्षिप्तमार्ताण्डकोटिप्रकाशम् ।
महाहीशभूषं सुरेशं महेशं
भजे पार्वतीशं महाताण्डवेशम् ॥ ८॥

महानृत्यसञ्जातभीमाट्टहासं
महायोगिहृत्पद्मकोशावभासम् ।
महानागयज्ञोपवीतावभासं
भजे पार्वतीशं महाताण्डवेशम् ॥ ९॥

भवानीश भूतेश भर्गासुरारे
भवारे पुरारे सुरेशार्चिताङ्घ्रे ।
न जानाति युष्मत्स्वरूपं जनोऽयं
भजे पार्वतीशं महाताण्डवेशम् ॥ १०॥

मुकुन्दाब्जहस्तोल्लसत्त्रासनादं (द्वेत्रनादैः)
नमद्देववृन्दं सुहृद्योगिवृन्दम् ।
लसत्कुन्ददन्तं शिवानन्दकन्दं
भजे पार्वतीशं महाताण्डवेशम् ॥ ११॥

जटाजूटगङ्गातरङ्गोर्मिचञ्च-
त्सहस्रांशु(म्बु)जातावृताकाशमीशम् ।
शरच्चन्द्रहासं सुकर्पूरभासं
भजे पार्वतीशं महाताण्डवेशम् ॥ १२॥

स्फुरन्मुद्रिकारत्नराजत्कराङ्घ्रिं
रणत्स्वर्णकोटीरराजद्भुजौघम् ।
लसन्मध्यसम्बद्धपट्टाभिरामं
भजे पार्वतीशं महाताण्डवेशम् ॥ १३॥

स्फुरन्तं नदन्तं महान्तं दिगन्तं
वसन्तं महाश्चर्यवासो नितान्तम् ।
अनन्तं भवान्तं भवानीहृदन्तं
भजे पार्वतीशं महाताण्डवेशम् ॥ १४॥

महादेव देवादिदेवेश शम्भो
भवन्तं विना देवमन्यं न जाने ।
क्षणाराधनेनाशुतोषं महेशं
भजे पार्वतीशं महाताण्डवेशम् ॥ १५॥

नमस्ते नमस्ते शिवानन्दकीर्ते
नमस्ते नमस्ते भवानन्दमूर्ते ।
नमस्ते नमस्ते शरण्यैकमूर्ते
नमस्ते नमस्ताण्डवाडम्बराय ॥ १६॥

नमस्ते नमस्ते जगज्जन्मकर्त्रे
नमस्ते नमस्ते नमः भालनेत्र ।
नमस्ते नमस्ते हरायाग(घ)हर्त्रे
नमस्ते नमस्ताण्डवाडम्बराय ॥ १७॥

नमः पार्वतीप्राणनाथाय तुभ्यं
नमः सर्वलोकैकनाथाय तुभ्यम् ।
नमो विष्णुहृत्पद्मकोशाय तुभ्यं
नमस्ते नमस्ताण्डवाडम्बराय ॥ १८॥

नमो दिव्यकैलासवासाय तुभ्यं
नमो दिव्यरत्नाहिभूषाय तुभ्यम् ।
नमः सर्वयज्ञोपवीताय तुभ्यं
नमस्ते नमस्ते नमः शङ्कराय ॥ १९॥

नमः शम्भवे टङ्कवज्राङ्किताय-
नमो भक्तलोकैकपालाय तुभ्यम् ।
इदं धूर्जटेस्ताण्डवस्तोत्रराजं
(प्रभाते)पठन्ति प्रसन्नाङ्गनेकः(न्तरङ्गाः)।
सुरेन्द्रादिभोगानिहैवास्य भुक्त्वा
तदन्ते लभन्ते शिवानन्दलोकम् ॥ २०॥

॥ इति श्रीताण्डवस्तोत्रं सम्पूर्णम् ॥

Proofread by Aruna Narayanan

*Shri Tandava Stotram*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*